वीसइमपाहुडाओ तत्तोहा णीणिया जइया ॥
सो उ उवक्कमकालो तयत्थनिव्विग्घसिक्खणत्थं च ।
आईय कयं चिय पुणो मंगलमारंभए तं च ।
अरहंते वंदित्ता चोद्दसपुव्वी तहेव दसपुव्वी ।
एक्कारसंगसुत्तत्थधारए सव्वसाहू य ॥

अंतः—

एसा अणुग्गहत्था फुडवियडविसुद्धवंजणा इणमो ।
एक्कारसहिं सएहिं अट्ठहिं अहिएहिं संगहिया ॥
११७६ । ओघनिर्युक्तिः समाप्ता ॥ छ ॥

(2) Piṇḍaniryukti (२) पिण्डनिर्युक्ति

Folios - 87 to 139
Extent - 708 Gāthās
Language - Prakrit
Size - 14·2 × 2 inches
Author - Bhadrabāhusvāmī
Condition - Good
Age of MS. - 1209 V. S.

आदिः—

॥ ॐनमः सिद्धेभ्यः ॥

पिंडे उग्गम उप्पायणेसणा संजोयणा पमाणे य ।

इंगाल धूम कारण अट्ठविहा पिंडनिज्जुत्ती ॥ १ ॥

अंतः—

एसो आहारविही जह भणिओ सव्वभावदंसीहिं ।

धम्मावस्सगजोगा जेण न हायंति तह कुज्जा ॥

जा जतमाणस्स भवे विराहणा सुत्तविहीसमग्गस्स ॥

सा होति निज्जरफला अज्झत्थविसोहिजुत्तस्स ॥ छ ॥

संवत् १२०९ कार्त्तिक वदि १२ सोमे पुस्तिकेयं लिखितेति ॥ छ ॥ मंगलं महाश्रीः ॥ छ ॥

*

No. 72 Daśavaikālikaniryukti दशवैकालिकनिर्युक्ति

Folios – 74
Language – Prakrit
Author – Bhadrabāhusvāmī
Age of MS. – c. First half of 13th cent. V. S.
Extent – 446 Granthas
Size – 11·5 × 1·5 inches
Condition – Good

*

No. 73 (1) Daśavaikālikasūtra (१) दशवैकालिकसूत्र

Folios – 1 to 57
Language – Prakrit
Author – Śayyambhavasūri
Age of MS. – c. First half of 13th cent. V.S.
Extent – 700 Granthas
Size – 14 × 1·7 inches
Condition – Good

(2) Pākṣikasūtra and Kṣāmaṇakasūtra (२) पाक्षिकसूत्र तथा क्षामणकसूत्र

Folios – 58 to 82
Language – Prakrit
Age of MS. – c. First half of 13th cent. V. S.
Extent – 300 Granthas
Size – 14 × 1·7 inches
Condition – Good
General Remarks – Fol. 57 & 82 bear picture-decorations.

आदिः—

अण्णाणमोहदलणी जणणी वरनाणभवियलोयस्स ।

सिरसा सहरिसभावो पणमामि सया सुयादेविं ॥ १ ॥

तित्थंकरे य तित्थे अतित्थसिद्धे य तित्थसिद्धे य ।

अंतः—

गुज्जरवंससमुब्भवसोभनभंडारियस्स धूयाए।........(खंडित)

*

No. 74 Daśavaikālikasūtra दशवैकालिकसूत्र

Folios - 60
Language - Prakrit
Author - Śayyambhavasūri

Age of MS. - c. Latter half of 14th cent. V. S.
Size - 12·2 × 1·7 inches
Condition - Good

*

No. 75 Daśavaikālikasūtra दशवैकालिकसूत्र

Folios - 53
Language - Prakrit
Author - Śayyambhavasūri

Age of MS. - c. Latter half of 14th cent. V. S.
Size - 14 × 2·2 inches
Condition - Good

आदिः—

॥ नमोऽर्हते ॥

धम्मो मंगलमुक्किट्ठं अहिंसा संजमो तवो ।
देवा वि तं णमंसंति जस्स धम्मे सया मणो ॥ १ ॥

अंतः—

अप्पा खलु सययं रक्खियव्वो, सव्विदिएहिं सुसमाहिएण ।
अरक्खिओ जाइपहं उवेइ, सुरक्खिओ सव्वदुहाण मुच्चइ॥ त्ति बेमि॥ छ॥
सेज्जंभवं गणहरं जिणपडिमादंसणेण पडिबुद्धं ।
मणगपियरं दसकालियस्स निज्जूहगं वंदे ॥
मणगं पडुच्च सेज्जंभवेण निज्जूहिया दसऽज्झयणा ।
वेयालिया य ठविया तम्हा दसवेयालियं नाम ॥ छ ॥
दसकालियं सम्मत्तं ॥ छ ॥

*

No 76/1 (1) Daśavaikālikasūtra (१) दशवैकालिकसूत्र

Folios - 73
Language - Prakrit
Author - Śayyambhavasūri

Age of MS. - c. Latter half of 14th cent. V. S.
Size - 14·2 × 2 inches
Condition - Good

(2) Pākṣikasūtra. (२) पाक्षिकसूत्र

Folios - 73 to 102 Size - 14·2 × 2 inches
Language - Prakrit Condition - Good
Age of MS. - c. Latter half of 14th cent. V. S.

आदिः—

अन्नाणमोहदलणी जगणी सुयनाणभवियलोयस्स ।
सिरसा सहरिसभावो पणमामि सुयायं सुयदेविं ॥ १ ॥
तित्थंकरे इ तित्थे अतित्थसिद्धे य तित्थसिद्धे य ।
सिद्धे जिणे य रिसि महरिसी य नाणं च वंदामि ॥ २ ॥

अंतः—

सुयदेवया भगवई नाणावरणीयकम्मसंघायं ।
तेसिं खवेउ सययं जेसिं सुयसायरे भत्ती ॥ छ ॥
पाक्षिकप्रकरणं समाप्तमिति ॥ छ ॥

(3) Pākṣika Kṣāmaṇaka (३) पाक्षिक क्षामणक

Folios - 102 to 104 Size - 14·2 × 2 inches
Language - Prakrit Condition - Good
Age of MS. - c. Latter half of 14th cent. V. S.

अंतः—

॥ क्षामणकसूत्रं समाप्तमिति ॥ छ ॥

(4) Pagāmasijjāya-Śramaṇapratikramaṇasūtra
(४) पगामसिज्जाय-श्रमणप्रतिक्रमणसूत्र

Folios - 104 to 110 Size - 14·2 × 2 inches
Language - Prakrit Condition - Good
Age of MS. - c. Latter half of 14th cent. V. S.

आदिः—

इच्छामि पडिक्कमिउं पगामसेज्जाए निगामसेज्जाए संथाराउव्वत्तणाए परियत्तणाए आउंटणाए पसारणाए छप्पइयसंघट्टणाए ।

अंतः—

खामेमि सव्वे जीवा सव्वे जीवा खमंतु मे ।
मेत्ती मे सव्वभूएसु वेरं मज्झ न केणइ ॥
एवमहमालोइय निंदिय गरहिय दुगंछियं सव्वं ।
तिविहेण पडिक्कंतो वंदामि जिणे चउव्वीसं ॥ छ ॥ शुभं भवतु ॥

(5) Ajitaśāntistava (५) अजितशान्तिस्तव

Folios - 111 to 117
Language - Prakrit
Author - Nandiṣeṇa
Age of MS. - c. Latter half of 14th cent. V. S.
Extent - 42 Gāthās
Size - 14·2 × 2 inches
Condition - Good

आदिः—

अजियं जियसव्वभयं संतिं च पसंतसव्वगयपावं ।
जइगुरुसंतिगुणकरे दो वि जिणवरे पणिवयामि ॥ १ ॥ गाहा ।

अंतः—

जो पढइ जो य निसुणइ उभओ कालं पि अजियसंतिथयमेयं ।
तस्स पसमंति रोगा पुव्वुप्पन्ना वि नासंति ॥ ४० ॥
जइ इच्छह परमपयं अहवा कित्ती सुवित्थडा भुवणे ।
ता तेलोक्कुद्धरणे जिणधम्मे आयरं कुणह ॥ ४१ ॥
श्रीमते शांतिनाथाय नमः शांतिविधायिने ।
त्रैलोक्यस्यामराधीशमुकुटाभ्यर्चितांह्रये ॥ ४२ ॥ छ ।

(6) Pravrajyāvidhāna (६) प्रव्रज्याविधान

Folios - 118 to 120
Language - Prakrit
Age of MS. - c. Latter half of 14th cent. V. S.
Extent - 24 Gāthās
Size - 14·2 × 2 inches
Condition - Good

आदिः—

संसारविसमसायरभवजलवडियाण संसरंताणं ।
जीवाणं कह वि जइ होइ जाणवत्तं व मणुयत्तं ॥ १ ॥
तत्थ वि बोही जिणदेसियंमि धम्मंमि निक्कलंकंमि ।
पव्वज्जापरिणामो सुकयपुन्नस्स जइ होइ ॥ २ ॥

अंतः—

दो च्चिय हुंति गईओ साहसवंताण धीरपुरिसाण ।
वेल्लहलकमलहत्था रायसिरी अहव पव्वज्जा ॥ २३ ॥
जइ इच्छसि मोक्खपयं अहवा कित्ती सुवित्थडा भुवणे ।
ता तियलोक्कुद्धरणे जिणधम्मे आयरं कुणह ॥ २४ ॥
पव्वज्जाविहाणं समत्तं ॥ छ ॥

(7) Sthavirāvalī (७) स्थविरावली

Folios - 120 to 125
Language - Prakrit
Author - Devavācaka
Age of MS. - c. Latter half of 14th cent. V. S.
Extent - 50 Gāthās
Size - 14·2 × 2 inches
Condition - Good

(8) Piṇḍaviśuddhiprakaraṇa (८) पिण्डविशुद्धिप्रकरण

Folios - 126 to 136
Language - Prakrit
Author - Jinavallabha Gaṇi
Age of MS. - c. Latter half of 14th cent. V. S.
Extent - 103 Gāthās
Size - 14·2 × 2 inches
Condition - Good

अंतः—

इति पिंडविशोधिप्रकरणं समाप्तम् ॥ छ ॥

(9) [Śobhanastuti] Caturviṃśikā (९) [शोभनस्तुति] चतुर्विंशिका

Folios - 137 to 153
Language - Sanskrit
Author - Śobhanamuni
Age of MS. - c. Latter half of 14th cent. V. S.
Extent - Kāvyas 96
Size - 14·2 × 2 inches
Condition - Good

आदिः—

॥ ॐनमः श्रीसर्वज्ञाय ॥

भव्यांभोजविबोधनैकतरणे ! विस्तारिकर्मावली-
रंभासामज ! नाभिनंदन ! महानष्टापदाभासुरैः ।
भक्त्या वंदितपादपद्म ! विदुषां संपादय प्रोज्झिता-
रंभासाम ! जनाभिनंदन ! महानष्टापदाभासुरैः ॥ १ ॥

अंतः—

॥ समाप्ता चेयं चतुर्विंशतिका समाप्ता ॥ छ ॥

*

No. 76/2 Daśavaikālikasūtra-Niryukti दशवैकालिकसूत्रनिर्युक्ति

Folios - 36
Language - Prakrit
Author - Bhadrabāhusvāmī
Age of MS. - c. Latter half of 13th cent. V. S.
Extent - 441 Gāthās
Size - 14·2 × 2 inches
Condition - Good
General Remarks - Nos. 76/1 & 76/2 are one bound ms.

आदिः—

सिद्धिगतिमुवगयाणं कम्मविसुद्धाण सव्वसिद्धाणं ।
णमिऊणं दसकालियणिज्जुत्ति कित्तइस्सामि ॥ १ ॥

अंतः—

आणंदअंसुपायं कासी सेज्जंभवा तहिं थेरा ।
जसभद्दस्स य पुच्छा कहणा य वियालणा संघे ॥ ३९ ॥
णायम्मि गिण्हियव्वे अगिण्हियव्वम्मि चेव अत्थम्मि ।
जइयव्वमेव इइ जो उवएसो सो णओ णामं ॥ ४४० ॥
सव्वेसिं पि णयाणं बहुविहवत्तव्वयं णिसामेत्ता ।
तं सव्वणयविसुद्धं जं चरणगुणट्ठिओ साहू ॥ ४४१ ॥ छ ॥
चूलियज्झयणनिज्जुत्ती समत्ता ॥ छ ॥ दसवेयालियणिज्जुत्तीओ समत्ताओ ॥ छ ॥

*

No. 77 Uttarādhyayanasūtra उत्तराध्ययनसूत्र

Folios – 178
Size – 13 × 1·5 inches
Language – Prakrit
Condition – Good
Age of MS. – 1236 V. S.

अंतः—

मंडलियसमावासियलेखकसोहीयनामेण ।
सुहिसज्जणिक्कवच्छलठक्कुरकेसवसुपुत्तेण ॥ १ ॥
संवत् बारछत्तीसइ १२३६ माघमाससुक्किलपक्खम्मि ।
तीयाए सुक्कवाराए फुडं लिहिया वरपुत्थिया एया ॥ २ ॥
मंगलं महाश्रीः ॥ शुभं भवतु लेखकपाठकयोः ॥

*

No. 78 Uttarādhyayanasūtra (Incomplete and Illustrated)
उत्तराध्ययनसूत्र (अपूर्ण, सचित्र)

Folios – 190
Size – 13 × 2·2 inches
Language – Prakrit
Condition – Good
Age of MS. – c. Latter half of 13th cent. V. S.
General Remarks – Fols. 17 to 20, 46, 101, 102, 117, 119 to 121, 130 and 185 to 188 missing.

Folio 1 contains a miniature painting (size : 1·5 × 2·2 inches) representing Pārśvanātha, in green, sitting in the *padmāsana*.

Folio 2 has a miniature (size : 1·5 × 2·2 inches) of Sarasvati, on a lotus, showing the lotus and the *varada mudrā* in her right hands and carrying the *vīṇā* and the book in the left ones. Her swan vehicle is shown near the left leg. She is painted yellow in complexion, wearing a black bodice and a yellow lower garment.

Folio 189 has a miniature (size: 1·5 x 2·2 inches) of the goddess Ambikā, four-armed, and sitting under the shade of a mango-tree. Her two right hands show the mango-bunch and the *varada mudrā* while she carries the citron and her child with her two left hands. The lion vehicle is sitting on her left.

Folio 189 has another miniature (Size : 1·2 x 2·2 inches) of the goddess Cakreśvarī, seated on a lotus, showing the disc (cakra) in two upper hands, and the *varada mudrā* and the *kalaśa* in the two lower ones.

Folio 190 has a miniature (size : 1·7 x 2 inches) showing a Jaina nun and a śrāvikā. In front of the nun is the *sthāpanā*.

*

No. 79 (1) Daśavaikālikasūtra-Niryukti (१) दशवैकालिकसूत्रनिर्युक्ति

Folios – 16
Language – Prakrit
Author – Bhadrabāhusvāmī
Extent – 445 Gāthās
556 Granthas
Size – 29 x 2·5 inches
Condition – Good

आदिः—

दसकालियणिज्जुत्तिं कित्तइस्सामि ॥ १ ॥

अंतः—

आणंदअंसुपायं कासी सेज्जंभवा तहिं थेरा ।
जसभद्दस्स य पुच्छा कहणा य वियारणा संघे ॥ ४३ ॥
णायम्मि गेण्हियव्वे अगेण्हियव्वम्मि चेव अत्थम्मि ।
जइयव्वमेव इइ जो उवएसो सो णओ णामं ॥ ४४ ॥
सव्वेसिं पि णयाणं बहुविहवत्तव्वयं णिसामेत्ता ।
तं सव्वणयविसुद्धं जं चरणगुणट्ठिओ साहू ॥ ४५ ॥
दसकालियणिज्जुत्ती समाप्ता । गाथा ४४५ ॥ श्लो० ५५६ ॥

(2) Daśavaikālikasūtra-Vṛtti (२) दशवैकालिकसूत्रवृत्ति

Folios – 170 (?)
Language – Sanskrit
Author – Ācārya Haribhadra
Size – 29 x 2·5 inches
Condition – Good

General Remarks – Fols. 10, 100, 102, 162 missing. Last two fols. only in pieces.

आदिः—

॥ नमः श्रुतदेवतायै ॥
जयति विजितान्यतेजाः सुराऽसुराधीशसेवितः श्रीमान् ।
विमलस्त्रासविरहितस्त्रिलोकचिंतामणिर्वीरः ॥

इहार्थतस्तत्प्रणीतस्य सूत्रतो गणधरोपनिबद्धस्य पूर्वगतोद्धृतस्य शारीरमानसाति-कटुकदुःखसंतानविनाशहेतोर्दशकालिकाभिधानस्य शास्त्रस्याऽतिसूक्ष्मस्य महार्थगोचरस्य व्याख्या प्रस्तूयते ।

अंतः—

समाप्ता दशवैकालिकटीका ।। छ ।।

महत्तराया याकिन्या धर्मपुत्रेण चिन्तिता ।
आचार्यहरिभद्रेण टीकेयं शिष्यबोधनी ।।

दशवैकालिकटीका............................ ।

*

No. 80 Daśavaikālikasūtra with Commentary **दशवैकालिकसूत्र सटीक**

Folios - 272
Language - Prakrit & Sanskrit
Author - Śayyambavasūri, Commentator Tilakācārya
Date of Composition - 1304 V. S.
Age of MS. - 1314 V. S.
Extent - 700+7000 Granthas
Size - 22·7 × 2·2 inches
Condition - Good

General Remarks - Fol. 1 contains a miniature painting of Śrī Neminātha and fol. 2 bears a picture of a teacher and his disciple in lesson. Fol. 272 bears a picture-decoration in red and black colours, size of each miniature 2·5 × 2·2 inches.

आदिः—

।। नमः श्रीपंचपरमेष्ठिभ्यः ।।

अर्हन्तः प्रथयन्तु मंगलममी शृंगारयन्तः सदा
पादांभोजरजःकणैः क्षितिवधूं काश्मीरलेशैरिव ।
तत्त्वार्थैकविदां सुवर्णरचनामाकर्ण्य येषां मुखात्
तत्तद्भावनया रसेन लभते कल्याणकोटिं जनः ।। १ ।।
देवः केवलसंपदे भवतु वः श्रीनाभिराजांगभू-
रंगानां क्रमतः स्थितिं गुरुतया विज्ञाय चिच्चक्षुषा ।
वृद्धायाः श्रुतसंपदोऽनुसमयं यांत्याः प्रभोराज्ञया ।
यावद् दुःप्रसभाभिधं गुरुमतो हस्तावलंबं ददौ
यः कृत्वा दशकालिकं मुनिपतिः शय्यंभवः सोऽवतात् ।। ४ ।।
शय्यंभवस्य श्रुतरत्नसिंधोः सर्वस्वभूतं दशकालिकं यत् ।
उद्घाटय बह्वर्थसुवर्णकोशं तद्भव्यसुग्राह्यमहं करोमि ।। ५ ।।

अंतः—

इति श्रीतिलकाचार्यविरचितायां दशवैकालिकटीकायामुत्तरचूलिकायाष्टीका समाप्ता ॥ छ ॥

तीर्थे वीरविभोः सुधर्मगणभृत्सन्तानलब्धोन्नति-
श्चारित्रोज्ज्वलचन्द्रगच्छजलधिप्रोल्लासशीतद्युतिः ।
साहित्यागमतर्कलक्षणमहाविद्यापगासागरः
श्रीचन्द्रप्रभसूरिरद्भुतमतिर्वादीभसिंहोऽभवत् ॥ १ ॥
तत्पट्टलक्ष्मीश्रवणावतंसाः, श्रीधर्मघोषप्रभवो बभूवुः ।
तत्पादपद्मे कलहंसलीलां, दधौ नृपः श्रीजयसिंहदेवः ॥ २ ॥
तत्पट्टोदयशैलशृंगमभजत्तेजस्विचूडामणिः
श्रीचक्रेश्वरसूरिरित्यभिधया कोऽप्यत्र भानुर्नवः ।
संप्राप्ताभ्युदयः सदैव तमसा नो जातु विच्छायितो
नैवोच्चंडरुचिः कदाचिदपि न प्राप्तापरागस्ततः ॥ ३ ॥
विललास स्वैरं तत्पट्टप्रासादचंद्रशालायाम् ।
श्रीमान् शिवप्रभगुरुः संयमकमलाकृतासक्तिः ॥ ४ ॥
श्रीशिवप्रभसूरीणां तेषां शिष्योऽस्मि मंदधीः ।
नाम्ना श्रीतिलकाचार्यः श्रुताराधनगृद्धिभाग् ॥ ५ ॥
एतां सोऽहं विषमदशवैकालिकग्रंथटीकां
तत्पादाब्जस्मरणमहसा मुग्धधीरप्यकार्षम् ।
तद् यत्किंचिद् रभसवशतो दब्धमस्यामशुद्धं
तत् संशोध्यं मयि कृतकृपैः सूरिभिस्तत्त्वविद्भिः ॥ ६ ॥
टीकां रचयता चैतां यन्मया सुकृतं कृतम् ।
भवे भवेऽहं तेन स्यां श्रुताराधनतत्परः ॥ ७ ॥
विक्रमनृपात् त्रयोदशशतमितसंवत्सरेषु यातेषु ।
टीका विनिर्ममेऽसौ गच्छति चतुरुत्तरे वर्षे १३०४ ॥ ८ ॥
शिष्या नः शस्यचारित्राः सर्वशास्त्राब्धिपारगाः ।
अस्यां साहायकं चक्रुः श्रीपद्मप्रभसूरयः ॥ ९ ॥
शिष्योऽस्माकमिमां टीकां यशस्तिलकपण्डितः ।
अलिखत् प्रथमादर्शे शोधयित्वाऽर्थतत्त्ववित् ॥ १० ॥
इह श्लोकसहस्राणां सप्तकं सर्वसंख्यया ७००० ।
प्रत्यक्षरेण संख्याय निश्चिकाय कविः स्वयम् ॥ ११ ॥

यावद् विजयते तीर्थं श्रीमद्वीरजिनेशितुः ।
तावदेष मरालीव खेलतात् कृतिमानसे ॥ १२ ॥ छ ॥

७००० ग्रंथाग्रं सप्त सहस्राणि सकलमपि संपूर्णानि ॥

शुभमस्तु सर्वजगतः परहितनिरता भवंतु भूतगणाः ।
दोषाः प्रयांतु नाशं सर्वत्र सुखी भवतु लोकः ॥ छ ॥

यादृशं पुस्तके दृष्टं तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥ १ ॥
अग्ने रक्षेज्जले रक्षेद् रक्षेत् शिथिलबंधनम् ।
कष्टेन लिख्यते शास्त्रं पुत्रवत् प्रतिपालयेत् ॥ २ ॥

श्रीप्रज्ञातिलकसूरीणां दशवैकालिकपुस्तकमिदं । पं. माणिक्यतिलकेन शोधितं । मंगलं महाश्रीः ॥

सुखमनुपमं स श्रीनेमिस्तनोति तनूमतां
दिशि दिशि गता यस्य स्फाराः शरीरमरीचयः ।
भुवनमहिते राजीमत्या विवाहमहोत्सवे
मदनजयिनः संराजंते शरा इव तेजिताः ॥ १ ॥
अतुच्छगांभीर्यनिवासभूमिर्नदीनभावप्रथितः पृथिव्याम् ।
ऊकेशवंशोऽस्ति पयोधिकल्पश्चित्रं तु जागर्त्ति जिनो यदन्तः ॥ २ ॥
तस्मिन्नादिमपुरुषावुभावभूतां नितांतकांतगुणौ ।
प्रथमो दाहडनामा वरणिगनामा द्वितीयश्च ॥ ३ ॥
तत्राभूद् भूतहिता वाल्हेविर्वरणिगस्य सद्गृहिणी ।
आनखशिखाग्रमग्र्यैः परिपूर्णा विमलगुणनिवहैः ॥ ४ ॥
तस्यामभूद् वरणिगस्य सुतः सुतीर्थवित्तव्ययार्जितयशाः किल देवचंद्रः ।
एकं बभूव खलु देवसिरिः कलत्रं, तस्य प्रशस्यमपरं ननु देमतेति ॥ ५ ॥
देवचंद्रस्य देवश्रीकुक्षिजस्तनुजोऽजनि ।
थिरचंद्रः कलासांद्रः सुता नायकनामिका ॥ ६ ॥
तस्यैव देमतकलत्रसमुद्भवोऽभूत्, प्रज्ञाचणः सलखणः प्रथमस्तनूजः ।
आचारचारुरपरो धनदेवनामा, गांभीर्यधैर्यशममुख्यगुणावुभौ च ॥ ७ ॥
थिरदेविरभूद् भार्या थिरचंद्रस्यातिविश्रुतौदार्या ।
असपत्नगुणं पत्नीयुगलं जज्ञे सलखणस्य ॥ ८ ॥

आद्या सूहवदेविः सहदेविश्चापरा परार्थपरा ।
धनदेवस्य च समजनि सधर्मिणी धाहिणिर्धीरा ॥ ९ ॥
थिरदेवीदयितायां थिरचंद्रस्याभवन्नथांगरुहाः ।
ऐरावतदंता इव चत्वारो निर्मलात्मानः ॥ १० ॥
आद्यस्तेषु समस्तशस्तगुणवर्गः पासणागः सुधी-
धर्मोद्धारकृदामणाग इति विख्यातो द्वितीयस्तथा ।
शांतः शांतिकुमार इत्यधिगतो बुद्धया तृतीयः पुन-
स्तुर्यः संयमधुर्यधीर्महणसिंहः सिंहशूरोऽस्त्यहो ! ॥ ११ ॥
राजीमतीति तेषां भगिनी भग्नातिमात्रमोहबला ।
यन्मानसे मरालीलीलायितमातनोति कृपा ॥ १२ ॥
पाहिणिः पासणागस्य गेहिनी गुणमंदिरम् ।
आमश्रीरामणागस्य दाराश्चाचारपारगाः ॥ १३ ॥
शांता शांतिकुमारस्य पाल्हुकेति सधर्मिणी ।
कलाकलापसंपन्ना मूर्त्तिश्चांद्रमसी यथा ॥ १४ ॥
सुतवती दुहिताद्वयमादिमा, सलखणस्य च सूहवगेहिनी ।
अभिधया प्रथमाऽजनि छाहिणिः, शमपरा त्वपरा ननु रूपिणिः ॥ १५ ॥
द्वितीया प्रेयसी तस्य सहदेविरजीजनत् ।
वोढारं ललितादेव्याः पासवीरं तनूद्भवम् ॥ १६ ॥
धनदेवस्य च दयिता धाहिणिनाम्नी सुतत्रयमसूत ।
धर्मार्थकामनाम्नः पुरुषार्थांस्त्रीन् क्रिया यद्वत् ॥ १७ ॥
नेमाकः प्रथमस्तेषु प्रथमो धर्मकर्मणि ।
द्वितीयोऽप्यद्वितीयोऽस्ति क्षमी लक्ष्मीधराभिधः ॥ १८ ॥
तार्त्तीयीकः सुकृतद्रुमालवालः पुनः सहजपालः ।
एषां धर्मैकरसा स्वसाऽथ माल्हेऽभिधानाऽस्ति ॥ १९ ॥
नागमतेति कलत्रं नेमाकस्यास्ति निर्मलचरित्रम् ।
लक्ष्मीधरस्य दयिता लक्ष्मश्रीः सकलजंतुहिता ॥ २० ॥
सीतेव विमलशीला सीतादेवीति सहजपालस्य ।
विनयालंकृतहृदया दयाविलासान्विता दयिता ॥ २१ ॥
अंगजाः पासणागस्य परोपकरणोल्वणाः ।
संभवो धनसिंहश्चासपालश्चेति सन्त्यमी ॥ २२ ॥

लाहिणि-पातूसंज्ञं जिनचरणाराधने सदाभिज्ञम् ।
भगिनीयुगलं जज्ञे विज्ञममीषां मतिप्राज्ञम् ॥ २३ ॥

अंगभूरामणागस्य केलिसिंहः कलागृहम् ।
तस्यास्ति शीलसंपन्ना कमलश्रीः सधर्मिणी ॥ २४ ॥

फूदी समस्ति किल शांतिकुमारपुत्री, नेमासुता मतिमती ननु रत्नदेविः ।
लक्ष्मीधरस्य दयिता खलु नायकेति, बद्धादरा सुकृतकर्मणि पर्वणीव ॥२५॥

इतश्च—

सद्धर्मकर्मसु रतः सहदामणागः, पादांबुजं निजगुरोरुपसेवमानः ।
शुश्राव भावपरिचुंबितचित्तवृत्तिर्ज्ञानानुभावमिति बुद्धिधनः कदापि ॥२६॥

तद्यथा—

मोहांधकारहरणैकदिवाकरस्य
संसारवारिनिधिदुर्द्धरवाडवाग्नेः ।
चारित्रराजसचिवस्य शिवस्य बन्धो-
र्ज्ञानस्य कः किल गुणौघवदावदः स्यात् ? ॥ २७ ॥

दुष्षमादोषतश्चैतत् पुस्तकाधीनतां गतम् ।
तल्लेखनमतः पुण्यद्रुमदोहदसोदरम् ॥ २८ ॥

अथाऽऽमणागो निजवल्लभायाः, आमश्रियः श्रेयसपुण्यहेतोः ।
व्यलेखयत् श्रीदशकालिकस्य, वृत्तिं समग्रश्रुतसाररूपाम् ॥ २९ ॥

भुवनानलेंदु १३१४ संख्ये विक्रमसंवत्सरे प्रवृत्ते च ।
संघसमक्षमिदानीं तद्व्याख्यां कारयामास ॥ ३० ॥ युग्मम् ॥

राजहंसाविमौ यावत् क्रीडतः पुष्करान्तरे ।
वाच्यमानं बुधैस्तावदिदं नंदतु पुस्तकम् ॥ ३१ ॥

मंगलं महाश्रीः ॥ छ ॥ शुभं भवतु ॥ प्रशस्तिः समाप्ता ॥ छ ॥

*

No. 81 (1) Kālikācāryakathā (१) कालिकाचार्यकथा

Folios – 5
Extent – 105 Granthas
Language – Prakrit
Size – 24·7 × 2 inches
Author – Dharmaghoṣasūri (?)
Condition – Good
Age of MS. – c. First half of 15th cent. V. S.

आदिः—

॥ ॐ नमो वीतरागाय ॥

हयपडिणीओ कइतित्थउन्नई जयउ कालगायरियो ।
विज्जाणंदरिसीण य देविंदो धम्मकित्तिधरो ॥ १ ॥
मगहेसु धरावासम्मि वइरसीहो निवो पिया तस्स ।
सुरसुंदरि त्ति पुत्तो य कालओ सरसई दुहिया ॥ २ ॥
कुमरो कयाइ पत्तो स वाह्यालीइ चूयवणमज्झे ।
निसुणइ गुणंधराइरियपासओ धम्मकहमेवं ॥ ३ ॥

अंतः—

इय सव्वत्थ अमोहा सीमंधरसामिवन्नियगुणोहा ।
कालयगुरू तमोहा दिवंगया हणियजणमोहा ॥ ४ ॥
कप्प-निसीह-कहावलिपभियणुसारेण इय महाइसया ।
कालयसूरिपबंधा बद्धा विमुणंतु मुणी (?) ॥ ५ ॥

॥ श्रीकालिकाचार्यकथा ॥ छ ॥

(2) Kālikācāryakatha (Prose) (२) कालिकाचार्यकथा (गद्य)

Folios - 6 to 20 Extent - 400 Granthas
Language - Prakrit Size - 24·7 × 2 inches
Age of MS. - c. First half of 15th cent. V. S. Condition - Good

आदिः—

. अत्थि इहेव जंबुद्दीवे दीवे भारहे वासे धरावासं नाम नयरं । तत्थ य वइरिवा सुंदरीवेहव्वदिक्खागुरू वइरसीहो नाम राया । तस्सय सयलंतेउरप्पहाणा सुरसुं नाम देवी । तीसे य सयलकलाकलावपारओ कालयकुमारो नाम पुत्तो ।

*

No 82 Uttarādhyayanasūtra Bṛhadvṛtti-Pāiyavṛtti

उत्तराध्ययनसूत्र बृहद्वृत्ति-पाइयवृत्ति

Folios - 395 Extent - 13345 Granthā
Language - Sanskrit Size - 28 × 2·2 inches
Author - Vādivetāla Sāntisūri of Thārāpadragaccha Condition - Good

General Remarks - Fols. 235-236 missing.

आदिः—

॥ ॐ नमो वीतरागाय ॥

शिवदाः सन्तु तीर्थेशा विघ्नसंघातघातिनः ।
भवकूपोद्धृतौ येषां वाग् वरत्रायते नृणाम् ॥ १ ॥

समस्तवस्तुविस्तारे व्यासर्पत्तैलवज्जले ।
जीयाच्छ्रीशासनं जैनं धीदीपोद्दीप्तिवर्धनम् ॥ २ ॥

यत्प्रभावादवाप्यन्ते पदार्थाः कल्पनां विना ।
सा देवी संविदे नः स्तादस्तकल्पलतोपमा ॥ ३ ॥

व्याख्याकृतामखिलशास्त्रविशारदानां, सूच्यग्रवेधकधियां शिवमस्तु तेषाम् ।
यैरत्र गाढतरगूढविचित्रसूत्रग्रन्थिर्विभिद्य विहितोऽद्य ममापि गम्यः ॥ ४ ॥

अध्ययनानामेषां यदपि कृताश्चूर्णि-वृत्तयः कृतिभिः ।
तदपि प्रवचनभक्तिस्त्वरयति मामत्र वृत्तिविधौ ॥ ५ ॥

इह खलु सकलकल्याणनिबन्धनं जिनागममवाप्य विवेकिनैवं विवेचनीयम् । यदुत महार्थोऽयं मनोरथानामप्यपथभूतो भूरिजन्मान्तरोपचितपुण्यपरिपाकतो महानिधिरिव मयाऽधिगतः ।

अंतः—

॥ इत्युत्तराध्ययनश्रुतस्कन्धटीकायां शिष्यहितायां जीवाजीवविभक्तिनामकमध्ययनं समाप्तम् ॥ ....

अस्ति विस्तारवानुर्व्यां गुरुशाखासमन्वितः ।
आसेव्यो भव्यसार्थानां श्रीकोटिकगणद्रुमः ॥ १ ॥

तदुत्थवैरशाखायामभूदायतिशालिनि ।
विशाला प्रतिशाखेव श्रीचन्द्रकुलसन्ततिः ॥ २ ॥

तस्याश्चोत्पद्यमानच्छदनिचयसदृक्काचकर्णान्वयोत्थः
श्रीथारापद्रगच्छप्रसवभरलसद्धर्मकिंजल्कपानात् ।
श्रीशान्त्याचार्यभृंगो यदिदमुदगिरद् वाङ्मधु श्रोत्रपेयं
तद्भो भव्याखिदोषप्रशमकरमतो गृह्यतां लिह्यतां च ॥ ३ ॥

श्रीभिल्लमालकुलशेखरशान्त्यमात्यनिर्मापिताणहिलपाटकचैत्यगेहे ।
भ्रातृव्यसम्पकमहत्तमकारितोरुसौवर्णरम्यकलशान्वयमूर्त्तिकीर्त्तौ ॥ ४ ॥

श्रीशांतिसूरिरकरोद् गुणसेणसूरिवाचोत्तराध्ययनशासनवृत्तिमेनाम् ।
प्रख्यापिता तदनु तद्गुणसर्वदेवसत्सूरिणाऽनणुगुणैकविशिष्यवर्गैः ॥ ५ ॥

सिद्धांतस्वाध्यायव्यसनतयाऽन्यासु वृत्तिषु सतीषु ।
यद् विरचितेयमपरा तत् सद्भिर्मर्षणीयं मे ॥ ६ ॥

यस्याभूद् गुरुरागमे गुणनिधिः श्रीसर्वदेवाह्वयः
सूरीशोऽभयदेवसूरिरविनख्यातः प्रमाणेऽपि च ।
तस्येयं सुगुरुद्वयादधिगतस्वल्पात्मविद्यागुण-
प्रख्याताय चिरं भुवि प्रचरतु श्रीशांतिसूरेः कृतिः ॥ ७ ॥

सट्टकश्रेष्ठिना श्रेष्ठश्रेयोनिःश्रेयसार्थिना ।
लिखितं गुरुभक्त्या स्यात् (स्तात्) प्रथमं प्रतिपुस्तकम् ॥ ८ ॥
अनाथपिंडदादीनां चेष्टितं चेष्टितैर्निजैः ।
जैनश्रद्धायतं(युतः) श्राद्धः स तुल्यः केन कथ्यताम् ? ॥ ९ ॥ छ ॥

श्रीश्रीमालपुरीयधर्कटमहावंशः सुपर्वाकुलः
सच्छायः सरलः सुमूलसहितः ख्यातोऽस्ति भूमंडले ।
यक्षाख्योऽथ बभूव तत्र गुणभृन्मान्यः क्षितीशैरपि
न्यायोवृत्तविभूषितोऽमलतनुर्मुक्ताफलप्रोज्ज्वलः ॥ १ ॥
विहितविशदचित्तः पात्रविन्यस्तवित्तः, प्रतिदिनशुभचर्यः सूनृतः शिष्टचर्यः ।
निरुपमशमभूमिः सद्यशःश्रीनिधानं, नयविनयवरिष्ठः श्रावकः सत्प्रतिष्ठः ॥२॥
यस्याजितस्त्रिभुवनप्रभुरेक एव, चित्ते निवृत्तभवसंगतिहेतुदोषः ।
तच्छासनोदितनयानुगता च वृत्तिर्वाक्काययोरुचितभाषणकृत्यपूता ॥ ३ ॥
उदारता दक्षिणता कृतज्ञता, विवेकिता सज्जनसंगचित्तता ।
इत्यादयो यत्र गुणा निरागसः, प्रीत्या स्वजातेरिव वासमाययुः ॥ ४ ॥
पत्नी बभूव सा तस्य यशोदेवी विवर्जिता ।
दूषणैर्गुणरत्नौघखानिर्निर्धूतकुग्रहा ॥ ५ ॥
अथाऽभूवन् सुतास्तस्याश्चत्वारोऽतिविचक्षणाः ।
देवचन्द्र इति ज्येष्ठः प्रद्युम्नाख्यस्तथाऽपरः ॥ ६ ॥
शान्तेर्गेहमथो शान्तिर्यशोभूमिस्तथाऽऽजडः ।
प्रधानलोकपालस्य चतस्रो नीतयो यथा ॥ ७ ॥
स्वर्गेऽपि ते निर्मलधर्मकर्मनिर्मापकाः कौशलशालिशीलाः ।
विशिष्टलोकैरभिनंदनीयाः, नरार्थवत् ख्यातिमवापुरुर्व्याम् ॥ ८ ॥
अथासौ श्रीयशोदेवी संवेगाक्षिप्तमानसा ।
एकदा चिन्तयामास संसारं वीक्ष्य दुस्तरम् ॥ ९ ॥

आयुर्वायुविधूततरूतलतिकालोलं वयो विस्फुर-
द्विद्युद्दीप्तिचलं स्मरार्त्ततरुणीभ्रूभंगुरा श्रीरपि

संसारे करिकर्णतालतरलं सौख्यादि सर्वं यत-
स्तस्मादक्षयसौख्यमोक्षकृदहो ! धर्मः परं सेव्यते ॥ १० ॥
प्रभवति स च ज्ञानात् तच्चार्हदागमतः स च
प्रतिकलगलत्प्रज्ञैर्ज्ञेयो विना नहि पुस्तकम् ।
इति तदमलं चक्षुः पुंसां कुबोधविषौषधं
शिवसुखकरं लेख्यं लोकद्वयीहितकृत् परम् ॥ ११ ॥
कामोद्दामदवे कषायशबराकीर्णे दुरन्तो...... .
................संकुले भवमहारण्येऽनिशं भ्राम्यताम् ।
मूढानां दृढमङ्गिनां विषयतृट्खेदच्छिदे तन्यते
धन्यैर्जैनमतं विलेख्य विधिना ज्ञानामृताम्भःप्रपा ॥ १२ ॥
युक्तं च ज्ञानदानं यदिह जिनपतिः केवलालोकमाप्य
त्रैलोक्यं बोधयिष्यन् समवसृतिगतः पूर्वमेवाख्यदेवम् ।
भो भव्याः ! मोक्षसौख्यप्रणिहितमतिभिर्ज्ञानमादौ विमृग्यं
पश्चात्तन्निश्चितायां सुकृतकृति सदा वर्त्तितव्यं क्रियायाम् ॥१३॥

यतः—

अज्ञानतः कृत्यविधौ प्रवृत्तो, न प्राप्नुयादैहिकमप्युपेयम् ।
स्वर्गापवर्गोद्भवसौख्यरूपं, पारत्रिकं किं पुनरादृतोऽपि ? ॥ १४ ॥
ज्ञात्वा चिन्तितमेतदस्तविविधव्यापद्व्रजं भक्तिवाः-
सेकादुत्कटकंटकोत्करमिषप्रोद्भूतपुण्यांकुरः ।
अर्हत्ताकरसर्वसार्ववचनव्यालेखनाभ्युद्यतः
शान्तिः पुस्तकमेतदर्थमनघं व्यालेखयामास सः ॥१५॥ मंगलम् ॥

*

No. 83 Uttarādhyayanasūtra with Sukhabodhā Vṛtti

उत्तराध्ययनसूत्र सुखबोधावृत्तिसहित

Folios – 413
Language – Prakrit & Sanskrit
Author of Vṛtti – Devendra Gaṇi alias Nemicandrasūri
Date of Composition of Vṛtti – 1129 V. S.
Age of MS. – 1308 V. S.
Extent – 5000 + 12000 Granthas
Size – 32·5 × 2·5 inches
Condition – Good

General Remarks – Fol. 341 missing. Fols. 1 & 411 contain beautiful miniature paintings of Tīrthankara along with attendant male & female chowrie-bearess. Fol. 2 bears a beautiful picture of the preceptor giving lesson to the disciple. A portion of all these three pictures has been rubbed off.

आदिः—

॥ ॐ नमो जिनशासनाय ॥

प्रणम्य विघ्नसंघातघातिनस्तीर्थनायकान् ।
सिद्धांश्च सर्वसाधूंश्च स्तुत्वा च श्रुतदेवताम् ॥
आत्मस्मृतये वक्ष्ये जडमतिसंक्षेपरुचिहितार्थं च ।
एकैकार्थनिबद्धां वृत्तिं सूत्रस्य सुखबोधाम् ॥
बह्वर्थाद् वृद्धकृताद्गंभीराद्विवरणात् समुद्धृत्य ।
अध्ययनानामुत्तरपूर्वाणामेकपाठगताम् ॥
अर्थान्तराणि पाठांतराणि सूत्रे च वृद्धटीकातः ।
बोद्धव्यानि यतोऽयं प्रारंभो गमनिकामात्रम् ॥

तानि च षट्त्रिंशद्भवन्ति । तत्र विनयमूलत्वाद्धर्मस्य प्रथमं विनयाध्ययनम् । तस्य चेदमादिसूत्रम् ॥ छ ॥

अंतः—

निर्युक्तिकार एतन्माहात्म्यायाह ।

जे किर भवसिद्धीया परित्तसंसारिया य जे भव्वा ।
तै किर पढंति एए छत्तीसं उत्तरज्झाए ॥
तम्हा जिणपन्नत्ते अणंतगमपज्जवेहिं संजुत्ते ।
अज्झाए जहजोगं गुरुप्पसाया अहिज्जिज्जा ॥

योग उपधानादिव्यापारस्तदनतिक्रमेण यथायोगमित्युत्तराध्ययनटीकायां सुखबोधायां षट्त्रिंशमध्ययनं समाप्तम् ॥ छ ॥

अस्ति विस्तारवानुर्व्यां गुरुशाखासमन्वितः ।
आसेव्यो भव्यसार्थानां श्रीकोटिकगणद्रुमः ॥ १ ॥
तदुत्थवैरशाखायामभूदायतिशालिनी ।
विशाला प्रतिशाखेव श्रीचंद्रकुलसन्ततिः ॥ २ ॥
तस्याश्चोत्पद्यमानच्छदनिचयसदृक्षाचवर्णान्वयोत्थ-
श्रीथारापद्रगच्छप्रसवभरलसद्धर्मकिंजल्कपानात् ।
श्रीशान्त्याचार्यभृङ्गः प्रवरमधुसमामुत्तराध्यायवृत्तिं
विद्वल्लोकस्य दत्तप्रमुदमुदगिरद् यां गभीरार्थसाराम् ॥ ३ ॥

तस्याः समुद्धृता चैषा सूत्रमात्रस्य वृत्तिका ।
एकपाठगता मन्दबुद्धीनां हितकाम्यया ॥ ४ ॥

आत्मसंस्मरणार्थाय तथा मंदधिया मया ।
अतोऽपराधमेनं मे क्षमन्तु श्रुतशालिनः ॥ ५ ॥

आसीच्चन्द्रकुलोद्भूतो विख्यातो जगतीतले ।
अक्षमाराजितोऽप्युच्चैः यः क्षमाराजितः सदा ॥ ६ ॥

धर्मः सुमूर्त्तिमानेव सौम्यमूर्त्तिः शशांकवत् ।
वर्जितश्चाशुभैर्भावै रागद्वेषमदादिभिः ॥ ७ ॥

सुनिर्मलगुणैर्नित्यं प्रशान्तैः श्रुतशालिभिः ।
प्रद्युम्न-मानदेवादिसूरिभिः प्रविराजितः ॥ ८ ॥

विश्रुतस्य महीपीठे **बृहद्गच्छ**स्य मण्डनम् ।
श्रीमान् **विहारुक**प्रष्ठः सूरि**रुद्योतना**भिधः ॥ ९ ॥

तस्य शिष्याऽऽम्रदेवोऽभूदुपाध्यायः सतां मतः ।
यत्रैकान्तगुणापूर्णे दोषैर्लेभे पदं न तु ॥ १० ॥

देवेन्द्रगणिश्चेमामुद्धृतवान् वृत्तिकां तद्विनेयः ।
गुरुसोदर्यश्रीमन्**मुनिचंद्राचार्य**वचनेन ॥ ११ ॥

शोधयतु बृहदनुग्रहबुद्धिं मयि संविधाय विज्ञजनः ।
तत्र च मिथ्यादुष्कृतमस्तु कृतमसंगतं यदिह ॥ १२ ॥

अणहिलपाटकनगरे दोहड्डिश्रेष्ठिसत्कवसतौ च ।
संतिष्ठता कृतेयं नवकरहरवत्सरे ११२९ चैव ॥ १३ ॥

पद्दिकातोऽलिखच्चेमां **सर्वदेवा**भिधो गणिः ।
आत्मकर्मक्षयायाथ परोपकृतिहेतवे ॥ १४ ॥

दोहड्डिश्रेष्ठिना चास्या लेखिता प्रथमा प्रतिः ।
जिनवाक्यानुरक्तेन भक्तेन गुणवज्जने ॥ १५ ॥

अनुष्टुभां सहस्राणि गणितक्रिययाऽभवत् ।
द्वादश ग्रन्थमानं तु वृत्तेरस्या विनिश्चितम् ॥ छ ॥
अङ्कतोऽपि १४००० ॥ छ ॥ सं. १३०८ वर्षे ज्येष्ठ वदि ७ बुधे ।

॥ ॐ नमो जिनागमाय ॥

प्रशस्यधर्मप्रभवः सुपर्वा विशालशाखो वरपत्रशोभः ।
महीभृतां मौलिषु माननीयः श्रीधर्कटानां प्रथितोऽस्ति वंशः ॥ १ ॥

साढाकनामा सुविशुद्धमध्यस्त्रासादिदोषैः परिवर्जितश्च ।
अजायतास्मिन् कुमुदावदातो मुक्तामणिर्भास्वरकान्तिदीप्रः ॥ २ ॥

समुद्र इव गंभीरः शशाङ्क इव शीतलः ।
दानवर्षी गज इव साढाकः श्रावकोऽभवत् ॥ ३ ॥

साढाकस्य सुताः पंच जज्ञिरे पाण्डवा इव ।
येऽर्थिसंघातजातानां कौरवाणां क्षयं व्यधुः ॥ ४ ॥

सर्वेऽपि धर्मरसिकाः सर्वेऽपि हितभाषिणः ।
पुमर्थसाधनपराः सर्वे जनहितैषिणः ॥ ५ ॥

आद्य आशाधरस्तेषां प्रमुखो गुणशालिनाम् ।
महीधरो द्वितीयस्तु गुणग्रामैकमंदिरम् ॥ ६ ॥

वोल्हाकनामा समभूत्तृतीयो हारवद् गुणी ।
शशांककाशसंकाशयशःपूरितभूतलः ॥ ७ ॥

यशोवीरश्चतुर्थोऽभूद्दानेश्वरशिरोमणिः ।
लोकोत्तरचरित्रोऽभूत् पंचमः पाजडस्तथा ॥ ८ ॥

महीधरस्य संजज्ञे संजातोज्ज्वलपुत्रका ।
गेहिनी देहिनीव श्रीर्महाश्रीरिति संज्ञिता ॥ ९ ॥

केल्हणो नाम संजज्ञे तनयः सनयस्तयोः ।
सद्गुरुचरणद्वन्द्वसमाराधनतत्परः ॥ १० ॥

अजायत प्रिया तस्य कमलश्रीर्महाशया ।
सत्यापितसुभद्रादिसतीलोका गुणैर्निजैः ॥ ११ ॥

सागरा इव लावण्यकलिताश्चतुराशयाः ।
अजायन्त सुधर्मिष्ठाश्चत्वारस्तनयास्तयोः ॥ १२ ॥

चन्दनादपि मनोज्ञवागभूदाद्य एष कडुकस्ततः पुनः ।
रासलः सहजधर्मकर्मठो येसलस्तु गुणराशिपेशलः ॥ १३ ॥

गाङ्गकस्तदनु गाङ्गवारिणा सन्निभः शुचितया विचक्षणः ।
देवपूजनरतो निरंतरं वासनारसनिवासमानसः ॥ १४ ॥

वल्लभास्तदनु जज्ञिरे क्रमात् शीलभूषणविभूषिताङ्गकाः ।
भर्तृपादपद्मैकदृष्टयो मूर्त्तिभाज इव संगताः श्रियः ॥ १५ ॥

पत्न्योऽभूवन् कुलोत्पन्नाः निःसपत्नाः प्रियंवदाः ।
पद्मश्रीश्चेति राज्यश्री लक्ष्मीः श्रीरिति संज्ञिताः ॥ १६ ॥

पद्मश्रियास्त्रयः पुत्राः संजाताः शुद्धबुद्धयः ।
प्रवाहा इव गङ्गाया जगतीपावनक्षमाः ॥ १७ ॥

प्रथमो मोहनस्तेषां जनमानसमोहनः ।
द्वितीयो विजयपालो बालोऽपि हि महामतिः ॥ १८ ॥

तृतीयो लिंबदेवाख्यो मातुरत्यन्तवल्लभः ।
सहकारसमाकारो निवासः संपदामिव ॥ १९ ॥

आल्हका च सुता जाता बाल्यादपि महासती ।
तपःकर्मणि सर्वस्मिन् निरता विरता भवात् ॥ २० ॥

द्वितीया महणू नाम संजाता तनया तया ।
राज्यश्रिया सुता जाता बउल्ह नामविश्रुता ॥ २१ ॥

श्रिया च तनया जाता गोसली नाम रूपभाक् ।
प्रवर्द्धमाना चन्द्रस्य कलेव विमलाकृतिः ॥ २२ ॥

तथा—

यशोवीरस्य सन्ताने सुतो नरपतिस्तथा ।
शिरपालश्च संजातः शान्तिगस्तत्सुतोऽभवत् ॥ २३ ॥

पाजडस्य प्रिया जज्ञे जयश्रीर्नाम विश्रुता ।
तथा सुतद्वयं जातं छाडा-आसलनामकम् ॥ २४ ॥

छाडाकस्य प्रिया जज्ञे लीलीरिति विशालवाक् ।
आसलस्य तथा जाता जाया आसमतिः शुभा ॥ २५ ॥

.... ।
.... ॥ २६ ॥

.... शया ।
इत्येवमादिसकलं साढाकस्य कुटुंबकम् ॥ २७ ॥

इतश्च—

श्रीमान् सत्त्वगृहं गभीरिमनिधिर्निःशेषभूषणैः
व्याकीर्णः शुचिसाधुरत्ननिकरैः पाठीनपीठान्वितः ।
संसेव्यः सुमनोभिरक्षयगुणज्ञानामृतोत्कंठितै-
र्नै.. ॥ २८ ॥

.... ।
.... ॥ १ ॥
....
.......................तयशोवादिसूरिस्ततश्च ।
सूरिः श्रीसर्वदेवस्तदनु समभवद्वादिवृन्दैकवंद्यः
श्रीमान् प्रद्युम्नसूरिः सकलकलिमलक्षालने वारिपूरः ॥ २ ॥

इत्येवमादिप्रमुखेषु सूरिवर्येषु गच्छत्सु कथावशेषम् ।
भद्रेश्वरः सूरिरजायतास्मिन्........................ ॥ ३ ॥
.... ।
.... ॥ ४ ॥
....
....भवत् ।
अक्लेशेन बभार मारविजयी श्रामण्यभारं पृथग्-
भागीकृत्य सुदुर्वहं स्ववपुषा सैकादशांगेन यः ॥ ५ ॥

श्रीसिद्धसेनसूरिस्तत्पट्टविशेषको जयति यस्य ।
कलिकोपमानसहिता दशनावलिरिव न तपःश्रीः ॥ ६ ॥

..............................भव्यार] विन्दप्रतिबोधहेतुः ।
ततो विवस्वानिव मानदेवः सूरिर्यशःपूरितदिग्वितानः ॥ ७ ॥

ततोऽभूच्चारुचारित्रचर्यामर्यादयांबुधिः ।
श्रीमद्रत्नप्रभाचार्यो धुर्यो माधुर्यशालिनाम् ॥ ८ ॥

तत्पादाम्भोजभृंगः प्रवरगुणयुतः सर्वसिद्धांतवेदी

.... ।

....

.... ॥ ९ ॥

....

.... ।

.............................हतवपुः शर्करामिष्टवाक्य-

न्यासः श्रेयःशिवश्रीं दिशतु भुवि सदा सूरिदेवप्रभोऽथ ॥ १० ॥

व्याख्यास्यतस्तस्य गुरोर्मुखाब्जाज्जैनागमं संसदि साधुवृत्तः ।
कुटुंबयुक्तः कटुको महात्मा सुश्राव सिद्धांतरहस्यमेतत् ॥ ११ ॥

चक्रे मुक्ति.....................त्रैलोक्यलक्ष्मीरपि
स्वायत्ता विदधे च दुर्गतिगतिस्तेनैव रुद्धाऽऽत्मनः ।
येन स्वं भुजपंजरार्जितमिदं वित्तं गुरोराज्ञया
सिद्धान्ताद्भुतपुस्तकस्य लिखने साफल्यमारोपितम् ॥ १२ ।

इत्याकर्ण्य वचः सुधाकवचितं वक्त्रांबुजात्सद्गुरोः
साधुः साधितमुक्तिमार्गमतिकः सद्भावनाभावितः ।
वर्षे सिद्धिवियत्कृशानुविधुभिः [१३०८] संख्याकृते श्रेयसे
पित्रोः सुंदरमुत्तराध्ययनकं ग्रन्थं मुदाऽलीलिखत् ॥ १३ ॥

न केवलं पुस्तकमेकमेव विलेखयामास................ ।
.... ॥ १४ ॥

....
पीयूषद्युतिनालिकेरकलितं चंद्रप्रभाचंदनम् ।
यावन्मेरुकरे गभस्तिकटके धत्ते धरित्र्यंगना
तावन्नन्दतु पुस्तकः सुगुरुभिर्व्याख्यायमानो बुधैः ॥ १५ ॥

मंगलमस्तु । प्रशस्तिरियं कृता लिखिता च श्रीरत्नाकरसूरिभिः ॥

No. 84 **Uttarādhyayanasūtra with Sukhabodhā Vṛtti**

उत्तराध्ययनसूत्र सुखबोधावृत्तिसहित

Folios - 301
Language - Sanskrit, Prakrit and Apabhraṃśa
Author - Nemicandrasūri
Date of Composition of Vṛtti - 1129 V. S.
Age of MS. - c. First half of 14th cent. V. S.
Size - 31 × 2·7 inches
Condition - Good

अंतः—

अस्ति विस्तारवानुर्व्यां० इत्यादि [See क्रमांक ८३]

श्रीनेमिचन्द्रसूरिरुद्धृतवान् वृत्तिकां तद्विनेयः ।
गुरुसोदर्यश्रीमन्मुनिचन्द्राचार्यवचनेन ॥ ११ ॥

शोधयतु बृहदनुग्रहबुद्धिं मयि संविधाय विज्ञजनः ।
तस्य च मिथ्यादुष्कृतमस्तु कृतमसंस्कृतं यदिह ॥ १२ ॥

॥ छ ॥ मंगलं महाश्रीः ॥ छ ॥ शुभं भवतु ॥ छ ॥

ॐ ॥ प्राग्वाटवंशेऽजनि मोहणाख्यः श्रेष्ठी प्रिया तस्य सुहागदेवी ।
तयोः सुतो नागडनामकोऽभूत् तस्यापि भार्या सलषू प्रसिद्धा ॥ १ ॥

तयोस्तु नारायणनामधेयः पुत्रोऽभवत् स्फूर्जितभागधेयः ।
चित्रं गुरुत्यागकृतादरोऽपि यः सर्वदा धार्मिकलोकधुर्यः ॥ २ ॥

तस्याऽभूत् कडुयाभिख्योऽनुजो धरणिगस्तथा ।
तयोः प्रियतमा लाखू जासलेति यथाक्रमम् ॥ ३ ॥

नारायणस्य संजज्ञे हसलेति सधर्मिणी ।
रत्नपालोऽभिधानेन पुत्रोऽभूद् हृदयप्रियः ॥ ४ ॥

जैनधर्मधुराधुर्यः श्रेष्ठी नारायणोऽन्यदा ।
श्रीमद्देवेन्द्रसूरीणामिति वाक्यामृतं पपौ ॥ ५ ॥

तथाहि—

विषयसुखपिपासोर्गेहिनः क्वास्ति शीलं ?
करणवशगतस्य स्यात्तपो वाऽपि कीदृक् ? ।
अनवरतमदभ्रारम्भिणो भावनाः किं ?
तदिह नियतमेकं दानमेवास्य धर्मः ॥ ६ ॥

तच्च त्रिधा सर्वविदो विदन्ति ज्ञानाभयोपग्रहदानभेदात् ।
तत्रापि विश्वैकविकासनेन सज्ज्ञानदानं प्रवरं वदन्ति ॥ ७ ॥

कालादिदोषान्मतिमांद्यतश्च तच्चाधुना पुस्तकमन्तरेण ।
न शक्यते कर्तुमतोऽत्र युक्तं भव्यस्य सत्पुस्तकलेखनं हि ॥ ८ ॥
एवं निशम्य सम्यक् श्रेष्ठी नारायणो विमलबुद्धिः ।
इदममलमुत्तराध्ययनपुस्तकं लेखयामास ॥ ९ ॥
यावद् व्योमसरोवरे विलसतः पक्षद्वयालंकृतौ
ज्योतिर्जालजटालनिर्मलजले श्रीराजहंसाविह ।
अज्ञानप्रसरान्धकारनिकरप्रध्वंसदीपोपम-
स्तावन्नन्दतु पुस्तकोऽयमनिशं व्याख्यायमानो बुधैः ॥ १० ॥ छ ॥

*

No. 85 Uttarādhyayanasūtra with Sukhabodhā Vṛtti

उत्तराध्ययनसूत्र सुखबोधावृत्तिसहित

Folios - 440
Language - Prakrit, Sanskrit and Apabhraṃśa
Author of Vṛtti - Nemicandrasūri
Date of Composition - 1129 V. S.
Age of MS. - 1352 V. S.
Extent - 2000 + 12000 Granthas
Size - 33 × 2·5 inches
Condition - Good

General Remarks - Fol. 1 contains three paintings of (1) Mahāvīra with Parikara, (2) Mahāvīra in Samavasaraṇa, & (3) Sudharmaswāmī, Jambū and Prabhava with pupils. This last illustration bears the titles : "जम्बूकुमारः श्रीसुधर्मस्वामी श्रीप्रभवः". Size of miniatures - 2·5 × 2·2 inches each.

Folio 2 contains three more miniatures, one of an ācārya teaching his disciple, another of lay Jainas (śrāvakas) attending the discourse, and the third of lay Jaina ladies (śrāvikās) and nuns attending the discourse of the teacher, shown in the first miniature. Size of miniatures - 2·7 × 2·2 inches, and 2·5 × 2·2 inches respy.

Folio 438 has three miniatures : (1) Labelled as श्रीशत्रुंजये श्रीआदिनाथ राइणि पुण्डरीकपादुका पाल्हणपुरात् संघः with Sāhu Āsadhara standing in front of the Lord, the name सा० आसधरः written below his figure. (2) Represents a Jaina ācārya with pupil and Saṃghapati Āsadhara with his wife, while in the (3) miniature we have Jaina śrāvakas and śrāvikās worshipping Pārśvanātha. Size of miniatures - 2·7 × 2·2 inches.

अंतः—

तदनतिक्रमेण यथायोगमित्युत्तराध्ययनटीकायां सुखबोधायां षट्त्रिंशमध्ययनं समाप्तम् ॥ छ ॥................ [See ग्रंथकारप्रशस्ति क्रमांक ८३]

स श्रीवीरजिनो जीयाद्यस्य पादनखांशवः ।
विकाशे भव्यराजीवराजेस्तरुणभानवः ॥ १ ॥

श्रुत्वा वटावाप्ति[....]मुख्यमुच्चैर्हिंसाफलं यत्र दयाप्रधानाः ।
धर्म्येषु कृत्येषु जना यतन्ते पुरं तदत्रास्ति दयावटाख्यम् ॥ २ ॥

तत्राऽभवत्कुमरसिंह इति प्रसिद्धः
श्रेष्ठी जिनेशपदपंकजबद्धरागः ।
सम्यक् त्रिवर्गनिरतोऽपि सुधर्मकामः
प्राग्वाटवंशतिलकः सदनं गुणानाम् ॥ ३ ॥

नाम्ना कुमरदेवीति तस्य जज्ञे सधर्मिणी ।
शीलादिभिर्गुणैः शुभ्रैः सुलसामनुकारिणी ॥ ४ ॥

तयोस्तनूजाः क्रमशो बभूवुः पंचप्रपंचाचरणेन वित्ताः ।
तत्रापि धुर्यो नयमार्गनिष्ठो देदाकनामा सुगुणैर्गरिष्ठः ॥ ५ ॥

द्वितीयः किल झांझाकस्तृतीयः सांगणाभिधः ।
धनपालश्चतुर्थस्तु पंचमोऽभयडाभिधः ॥ ६ ॥

आद्यस्य सीलपात्रं विंझलदेवी बभूव सुकलत्रम् ।
देवगुरुविनयनम्रा धांधलदेवी द्वितीयस्य ॥ ७ ॥

शृंगारदेव्यभिधया शुचिशीला सांगणस्य जायाऽभूत् ।
धनपालस्य तु दयिता सलषणदेवीति सुयथार्था ॥ ८ ॥

आल्हणदेवी संज्ञा जज्ञे जाया पुनः कनिष्ठस्य ।
देदाकस्य तनुभुवोऽजयसिंहप्रभृतयोऽभूवन् ॥ ९ ॥

धर्मकर्मरते नित्यं गुरुलज्जाविभूषणे ।
देदादीनां स्वसारौ द्वे लील्ह-हंसी बभूवतुः ॥ १० ॥

अथ संस्तारकदीक्षां प्रपद्य जनके सुरालयं प्राप्ते ।
देदाकः सकुटुम्बः शुश्रावैवं सुगुरुवाक्यम् ॥ ११ ॥

मनुष्यत्वादिदुष्प्रापां लब्ध्वेमां द्वादशांगिकाम् ।
धर्म एव विधातव्य इहामुत्र सुखार्थिना ॥ १२ ॥

यद्यपि स चतूरूपः प्ररूपितस्तीर्थनायकैर्भविनाम् ।
गृहिणस्तथापि सुकरो विशेषतो दानधर्मोऽत्र ॥ १३ ॥

सोऽपीह ज्ञानाभयधर्मोपष्टंभदानतस्त्रिविधः ।
तत्राद्यमेव दानं विशेषतः परमपदहेतु ॥ १४ ॥

सूत्रार्थदानसाहाय्यकरणपुस्तकलिखापनाद्यैः स्तः ।
बहुधा तथापि पुस्तकलेखन.. .... ॥ १५ ॥

श्रीजैनसिद्धान्तविलेखनं यः श्राद्धः सुधीः कारयति स्वशक्त्या ।
भुक्त्वा गवेशत्वमवाप्य सर्वे लक्ष्मीमसौ याति पदं प्रकृष्टम् ॥ १६ ॥

इति देदाकः श्रेष्ठी श्रुत्वा स कुटुम्बसंयुतो मुदितः ।
समगृह्णीत सुवृत्तिं सदुत्तराध्ययनसूत्रस्य ॥ १७ ॥

प्रभासेते महीपीठे यावच्चन्द्रदिवाकरौ ।
वाच्यमानो बुधैस्तावदेष नन्दतु पुस्तकः ॥ १८ ॥ छ ॥

॥ शुभं भवतु सर्वसंघस्य ॥ छ ॥

[मुख्यग्रन्थलेखकश्रेष्ठिन **आ**शाधरस्य खण्डिता प्रशस्तिः]

...................नेव सफलीक्रियते सदा ॥ १४ ॥

आशाधरस्तदाद्यः **सं**घपतिः सप्ततीर्थसुप्रतीतः ।
निर्मलकीर्त्तिर्**दे**सलसंज्ञस्तस्यानुजन्मा च ॥ १५ ॥

लावण्यपात्रं किल **लू**णसिंहस्तयोर्लघुः पापगजैकसिंहः ।
न्यायार्जितैर्यस्य धनैः सदैव साधुत्वभावं हि व्रतं विनैव ॥ १६ ॥

रत्नश्रीः सद्भार्या तेषामाद्यस्य श्रीरिवाभाति ।
................**भो**ली **ला**छिर्**ला**वण्यसिंहस्य ॥ १७ ॥

रत्नश्रीकुक्षिजाः पुत्र्यश्चतस्रश्चतुराशयाः ।
माणिका प्रथमा तासां शोभितोभयपक्षका ॥ १८ ॥

ततः **सो**हगसंज्ञा च शीलादिगुणभूषिता ।
तृतीयतुर्ये दुहिते **क**स्मीरी-**मा**तुकाभिधे ॥ १९ ॥

सहजपाल इति प्रथमः सुतः सहजसद्गुणतः सुमनोमतः ।
भुवनपेसल**दे**सलसं[ज्ञितः],............कृतदुःकृततानवः ॥ २० ॥

द्वितीयः **सा**हणाभिख्यः ख्यातः स्वगुणसम्पदा ।
जिनाह्निकमले भृंगस्तृतीयः **स**मराभिधः ॥ २१ ॥

ऋजुता सुसखी यस्याः सा झणकूस्तनूरुहा ।
रंभाभिधा तदन्या च देसलस्य शुभात्मनः ॥ २२ ॥

सहजलदेवी जाया मायामुक्तस्य सहजपालस्य ।
राजमतिः सत्कान्ता साहणसाधोस्तु सद्बु[द्धेः] ॥ २३ ॥

[सुतो] लावण्यसिंहस्य सामन्तः समतायुतः ।
तल्लघुः सांगणश्चापि कुलधूर्धवलः किल ॥ २४ ॥

पुण्यपानीयसंपर्काद् वृद्धिं याति कुलद्रुमे ।
आशाधरो विशुद्धात्मा चिन्तयामास चेतसि ॥ २५ ॥

श्रुताधीनं कलौ धर्मं नैव तत्पुस्तकं विना ।
पुस्तकानि तु लिख्यन्ते लेखकैर्लब्धवेतनैः ॥ २६ ॥

विचिन्त्येति स्वचित्तेन पित्रोः पुण्याय भावतः ।
उत्तराध्ययनस्येह ससूत्रं वृत्तिपुस्तकम् ॥ २७ ॥

सिद्धसूरिगुरोराज्ञां बिभ्राणः शिरसा भृशम् ।
करेष्वग्नीन्दु १३५२ वर्षेऽत्र व्यलीलिखदवाचयत् ॥ २८ ॥ युग्मम् ॥

एवं संघाधिपोऽसौ विशदगुणमयः साधुआशाधराह्वः
पित्रोः पुण्याय हर्षादतिरुचिरमिदं पुस्तकं वर्ण्य[वर्णम्] ।
................व्रतानां कलितमसि सतामुत्तराध्यायवृत्तेः
विद्वल्लोकस्य चित्तप्रशमसुखकरं कारयामास विज्ञः ॥ २९ ॥

आशाधर ! तवापूर्वा कीर्त्तिवल्ली समुद्गता ।
आलवालेव दुष्काले निर्जले दीनदानतः ॥ ३० ॥

श्रीदेवगुप्तसूरीणां शिष्यः समुदि संसदि ।
पासमूर्त्तिस्तदादेशात् किमप्यर्थमभाषत ॥ ३१ ॥

................जस्येह पुष्पदन्तौ स्थिराविमौ ।
गुरुभिर्वाच्यमानोऽयं तावन्नन्दतु पुस्तकः ॥ ३२ ॥ छ ॥

संवत् १३५२ वर्षे वर्षाकाले श्रीउपकेशगच्छे ककुदाचार्यसंताने श्रीसिद्धसूरिप्रतिपत्तौ सा० देसलसंताने सा० गोसलात्मजसंघपतिआशाधरेण श्रीउत्तराध्ययनवृत्तिः ससूत्रा कारिता ॥

No. 86 Uttarādhyayanasūtra with Sukhabodhā Vṛtti

उत्तराध्ययनसूत्र सुखबोधावृत्तिसहित

Folios - 477
Language - Prakrit, Sanskrit
Author - Nemicandrasūri
Date of Composition of Vṛtti - 1129 V. S.

Age of MS. - 1296 V. S.
Extent - 14000 Granthas
Size - 33·7 × 2·5 inches
Condition - Good

अंतः—

सं. १२९६ चैत्र व० १० सोमे ॥

बभूव भूतलाभोगवित्तप्राग्वाटवंशजः ।
शिष्टाचाररतः श्रेष्ठी धीनाको नामधेयतः ॥ १ ॥
तत्कलत्रं तु पद्मश्रीः शमश्रीरिव केवला ।
अभवत् पासचंद्राख्यस्तयोः सूनुः सुधार्मिकः ॥ २ ॥
पौत्रस्तु गुणपालाख्यो धीनाकश्रेष्ठिनश्चान्यदा ।
श्रीदेवेन्द्रमुनीन्द्रस्य देशनामशृणोदिति ॥ ३ ॥
ज्ञानाभयोपग्रहदानभेदाद्दानं त्रिधा सर्वविदो वदंति ।
तत्रापि तीर्थत्रुटिकारणेन सुज्ञानदानं प्रवरं गदंति ॥ ४ ॥
कालादिदोषान्मतिमांद्यतश्च तन्नो भवेत् पुस्तकमंतरेण ।
चलश्रिया शाश्वतसौख्यकारि तल्लेखनं युक्तमतः सतां हि ॥ ५ ॥
श्रुत्वेति श्रेष्ठिधीनाकः स्वश्रेयोऽर्थमलेखयत् ।
पुण्यं श्रीउत्तराध्यायलघुसद्वृत्तिपुस्तकम् ॥ ६ ॥
यावज्जयी जैनवरेंद्रधर्मो यावच्च खेऽमू चरतोऽर्कचंद्रौ ।
तावत् क्षितौ नंदतु पुस्तकोऽयं वाचय्यमानो विदुषां समूहैः ॥ ७ ॥

*

No. 87 (1) Niśśeṣasiddhāntavicāra (upto Vyavahārasaptama Uddeśa)

(१) निश्शेषसिद्धान्तविचार (व्यवहारसप्तमोद्देशपर्यन्त)

Folios - 129/1 to 210
Language - Prakrit, Sanskrit
Author - Candrakīrti
Date of Composition - 1212 V. S.

Age of MS. - 1212 V. S.
Size - 14 × 2 inches
Condition - Good

General Remarks - (1) Ācārāṅgādi-Aṅga-Upāṅga-gata vicāra Fols. 129/1-147.
(2) Niśīthasūtragata Vicāra & Gāthās „ 147-183.
(3) Kalpagata Vicāra „ 184-195.
(4) Vyavahārasūtra Vicāra up to 7th Uddeśa Fols. 195-210.

आदिः—

विचारास्तु लिख्यंते यथा—

अह सा भमरसन्निभे कुचफणगपसाहिए ।
सयमेव लुंचई केसे धिइमंता ववस्सिया ॥ १ ॥

इत्युत्तराध्ययनेषु ॥ छ ॥ से आगंतारेसु आरामागारेसु वा गाहावइकुलेसु वा परियावसहेसु वा जे भवंतारो उउबद्धयं वा वासावासियं वा कप्पं उवाइणित्ता तत्थेव भुज्जो संवसंति । अयमाउसो ! कालाइक्कंतकिरिया वि भवइ । अर्थस्तु आगंतारादिषु ये भगवंतः ऋतुबद्धमिति शीतोष्णकालयोर्मासकल्पमुपनीय अतिवाह्य वर्षासु वा चतुरो मासानतिवाह्य तत्रैव पुनः कारण आसते । अयमायुष्मन् ! कालातिक्रांतवसतिदोषः संभवति । इति मासकल्पवर्षाकल्पानंतरं न स्थातव्यम् ॥ छ ॥

अंतः—

अट्ठमी पक्खिए मोत्तुं वायणाकालमेव य ।
पुव्वुत्ते कारणे वाई गमणं होअकारणे ॥ १ ॥

व्यवहारे सप्तमस्य समर्थितानि ॥ छ ॥ अष्टमे तु यथा । ग्रंथाग्रं २७०० ॥ छ ॥

(2) Niśśeṣasiddhāntavicāra-beginning with the 8th Uddeśa

(२) निश्शेषसिद्धान्तविचार-अष्टमोद्देश

Folios - 1–20
Language - Prakrit, Sanskrit
Author - Candrakīrti Gaṇi
Date of Composition - 1212 V. S.
Age of MS. - 1212 V. S.
Extent - 2000 Granthas
Size - 13·7 × 2 inches
Condition - Good

आदिः—

॥ व्यवहारे सप्तमस्य समर्थितानि । अष्टमे तु—

उच्चारं पासवणं अणुपंथे चेव आयरंतस्स ।
लहुओ य होइ मासो चाउम्मासो य वित्थारो ॥ १ ॥ छ ॥

नवमे यथा—

चेइयदव्वं विभया करेज्ज कोई नरो सयट्ठाए ।
समणं वा सोवहियं विक्केज्जा संजयट्ठाए ॥ १ ॥

चूर्णिर्यथा—चेइयद्रव्यं हृत्वा चोरा विभएज्ज । तत्थ कोइ अप्पणगं भागं समणाणं देज्ज । जो वा संजयं सोवहियं विक्किणित्ता तं फासुगं समणाणं देज्ज तं किं कप्पइ न कप्पइ वा ? । उच्यते इत्याह ।

अंतः—

तए णं सा चेल्लणा देवी जेणेव समणे भगवं महावीरे तेणेव उवागच्छइ २ समणं भगवं पंचविहेणं अभिगमेणं अभिगच्छइ। सेणियरायं पुरओ कट्टु ठिया चेव तिविहाए पज्जुवासणाए पज्जुवासइ ॥ छ ॥ इति दशाश्रुतविचाराः समर्थिताः ॥ छ ॥

शिष्यांभोजदिवाकरस्य पुरतः श्रीधर्मघोषप्रभोः
सिद्धांतं विमलाख्यसूरिगणभृत्शिष्येण संश्रृण्वता ।
स्मृत्यर्थं गणिचंद्रकीर्त्तिकृतिना केचिद्विचारा वराः
संत्येते परिपिंडिताः परिलसत्सिद्धांतरत्नाकरात् ॥ छ ॥

इति निःशेषसिद्धांतविचाराः समर्थिताः ॥ छ ॥ इति निःशेषसिद्धांतविचाराः सहस्रद्वयमानाः समाप्ताः ॥ छ ॥

(3) Pratiṣṭhā-vidhi (३) प्रतिष्ठाविधि

Folios – 21–22
Size – 13·7 × 2 inches
Language – Sanskrit
Condition – Good
Age of MS. – 1212 V. S.

अंतः—

स्नातो लिप्तश्च गंधैः धृतसदशयुगो विद्यया क्लृप्तरक्षो
मुद्रावान् दिक्पतिभ्यः प्रचुरतरबलिं संयतः संप्रदाय ।
नंदावर्त्तस्य पूजां तदनु वितनुते देवताकंकणार्चा
पंचांगो मंत्रपाठो मलयजतिलकः पुष्पमालाधिरोपः ॥ १ ॥
सप्तधान्यकरत्नांबु पंचधात्वंगघर्षणम् ।
मृत्कषायांबु मांगल्यमूली चाष्टकमज्जनम् ॥ २ ॥
प्रतिष्ठादेवताह्वानं स्नानं जातीफलादिभिः ।
स्नानं सर्वौषधिस्नानी वासचंदनकुंकुमैः ॥ ३ ॥
कर्पूरस्नानमुद्रासुरभिकरयुगालेप्यगात्रानुलेपः
पुष्पारोपः सपुष्पः प्रतिसरकरणं वासनिक्षेपणं च ।
वेदीन्यासोऽथ कृत्यः सदशयुगधृता सर्पिरापूर्णदीपाः
देयाः सार्द्रा यवारास्तदनु बलिशरावाणि पूर्णो बलिश्च ॥ ४ ॥
देयो दिग्देवताभ्यो बलिरुदकयुतो भूतसार्थे सधूपः
वस्त्राच्छादस्तदंतेऽञ्जलिभिरथ तथा सप्तसस्याभिषेकः ।
पुष्पारोपो विधेयस्तदनु पुनरिहारात्रिकं वंदनं स्या-
च्चैत्यानां चाधिवासः प्रतिकृतिविषयः स्यात्तथोत्सर्गमार्गः ॥ ५ ॥

श्रुतदेव्यादिदेवीनां कायोत्सर्गान् विधाय च ।
ततः पातालमित्यादि पठन् पुष्पांजलिं क्षिपेत् ॥ ६ ॥

अयं अधिवासनाविधिः ॥

कृत्वा शांतिबलिं प्रणम्य च जिनान् धूपं क्षिपेदादरा-
दासादस्तदनंतरं चलजिने दर्भाद्यधः स्थापयेत् ।
अन्यस्यास्तु कुलालचक्रकमृदा युक्तं च रत्नासनं
स्थाप्यं मंत्रयुतं स्थिरीकृतिकृते मंत्रं न्यसेदादरात् ॥ ७ ॥

सौवीरमधुसर्पिभी रूप्यकच्चोलकस्थितैः ।
नेत्रोन्मीलनं कुर्यात् सूरिः स्वर्णशलाकया ॥ ८ ॥

घृतपूरितकच्चोलकदधिभांडादर्शदर्शनं चैव ।
सौभाग्यमंत्रपवनं मुद्रा सौभाग्यपदपूर्वा ॥ ९ ॥

कर्पूरचंदनसमालभनं प्रतिष्ठा मंत्राभिमंत्रितमथापि च पुष्परोपः ।
वासान् क्षिपेत्तदनु धूपविधिं विदध्यान्मंत्रं न्यसेत् पुनरियं खलु चक्रमुद्रा ॥१०॥

धूपोद्ग्राहणबहुबलिचंदनतिलका भवंति कर्त्तव्याः ।
दध्यक्षतावमिणने कार्ये चतुरादिभिः स्त्रीभिः ॥ ११ ॥

कर्त्तव्यो लवणावतारणविधिः पश्चात्तथाऽऽरात्रिकं
भूतेभ्यः प्रचुरो बलिः पुनरधो रत्नासनस्थापनम् ।
अस्मिश्चोपविशंतु तीर्थपतयो जातप्रतिष्ठां पठन्
पुष्पाणामिह चांजलिं प्रतिक्षिपेदेवं पठंश्चादरात् ॥ १२ ॥

इदं पुष्पं गृह्णन्तु जिना इदं पुष्पं गृह्णन्तु जिना इति श्रुतदेव्यादिदेवीनां कायोत्सर्गात् ।
जह सिद्धाण पइट्ठा तिलोयचूडामणिम्मि सिद्धिपए ।
आचंदसूरियं तह होउ इमा सुप्पइट्ठ त्ति ।
अयं प्रतिष्ठाविधिः समर्थितः ॥ छ ॥

(4) Prāyaścittavicāra (४) प्रायश्चित्तविचार

Folios – 23
Language – Sanskrit
Age of MS. – 1212 V. S.
Size – 13·7 × 2 inches
Condition – Good

(5) Niśśeṣasiddhāntaparyāya (५) निश्शेषसिद्धान्तपर्याय

Folios - 24 to 111
Language - Prakrit, Sanskrit
Author - Candrakīrti Gaṇi
Date of Composition - 1212 V. S.

Age of MS. - 1212 V. S.
Extent - 1670 Granthas
Size - 13·7 × 2 inches
Condition - Good

General Remarks - Fol. 110 bears an excellent picture-decoration.

१	पंचवस्तुकपर्याय	पत्र	२४–२८
२	आचारांगपर्याय	पत्र	२८–३१
३	सूत्रकृतांगपर्याय	पत्र	३१–३३
४	स्थानांगपर्याय	पत्र	३३–३७
५	समवायांगपर्याय	पत्र	३७–३९
६	भगवतीसूत्रपर्याय	पत्र	४०
७	प्रश्नव्याकरणपर्याय	पत्र	४०
८	जीवाभिगमपर्याय	पत्र	४०–४१
९	प्रज्ञापनोपांगपर्याय	पत्र	४१–४२
१०	निशीथचूर्णीपर्याय	पत्र	४३–७१
११	कल्पपर्याय	पत्र	७२–९०
१२	व्यवहारपर्याय	पत्र	९१–९४
१३	पंचकल्पपर्याय	पत्र	९४–९९
१४	दशाश्रुतस्कंधपर्याय	पत्र	९९–१०५
१५	जीतकल्पपर्याय	पत्र	१०६–११०
१६	पाक्षिकसूत्रपर्याय	पत्र	११०
१७	ग्रंथकृतादि प्रशस्ति	पत्र	११०–१११

आदिः—

पंचवस्तुकस्य यथा—

चिइवंदण १ रयहरणं २ अट्ठा ३ सामाइयस्स उस्सग्गो ४ ।
सामाइयतियकड्ढण ५ पयाहिणं चेव तिक्खुत्तो ६ ॥ १ ॥

निर्यूहकः गवाक्षः ।

मुहपोत्तिय १ रयहरणं २ दोन्नि निसेज्जाओ ४ चोलपट्टो य ५ ।
संथारु ६ त्तरपट्टो ७ तिन्नि य कप्पा मुणेयव्वा १० ॥ २ ॥

केइ भणंति एक्कारसमो दंडओ ।

अप्पडिलेहियदोसा आणाई अविहिणा वि ते चेव ।
तम्हा उ सिक्खियव्वा पडिलेहा सेवियव्वा य ॥ ३ ॥

द्रव्यपरिच्छेदपूर्वमिति द्रव्यं वासाः । मा हासिष्ट ओहाक् त्यागे, मायोगे सिचि अद्यतन्यां प्रयोगः । गलप्रव्रजिताऽविधिपरिपालनादिना इति मिष्टान्नादिना गलप्रव्रजितस्याऽविधिपालनादिना । पहवंते प्रभवति विद्यमाने । तानन्विषतो तानंतान् । किक्किसिघाणं जीवविशेषः । अम्हं पुण नत्थि एतन्मतमिति शेषः । भाणकोणाः पात्रबंधकोणाः । ताहे उवओगं वच्चइ । पंचहिं इति पंचभिः पूर्वोक्तैः स्थानैः ।

अंतः—

पाक्षिकवृत्तौ पक्खसंधी अमावास्या । तो कह **निज्जुत्तीए**ऽणुमइ इति **आवश्यकनिर्युक्तिः** । उत्सन्नवधादिलिंगगम्यं इति उत्सन्नं बाहुल्यतः । अत्र **वृद्धसंप्रदायः**—हत्थुत्थरणं खरडं १ कोयवओ बूरट्ठिया २ पावारो सलोमपडओ ३ नवओ जीर्णं ४ दढगालि धोयपोत्ती, सदसवत्थं ति भणियं होइ ५ । रालग कंगू ॥ छ ॥ संवत् १२१२ आषाढ वदि १२ **गुरौ** लिखितेयं **सिद्धांतोद्धारपुस्तिका** लेखक**देव**प्रसादेनेति ॥ छ ॥ ग्रंथाग्रं १६७० द्वितीयखंडम् ॥ छ ॥

शिष्यांभोजवनप्रबोधनरवेः श्री**धर्मघोष**प्रभोः
वक्त्रांभोजविनिर्गताः कतिपयाः सिद्धांतसत्का अमी ।
पर्याया गणि**चंद्रकीर्त्ति**कृतिना संचित्य संपिंडिताः
स्वस्य श्री**विमलाख्यसूरि**गणभृच्छिष्येण चिंताकृते ॥ छ ॥

आस्ते श्रीमदखर्वपर्वततिभिः सर्वोदयः क्ष्मातले
छायाच्छन्नदिगंतरः परिलसत्पत्रावलीसंकुलः ।
सेवाकारिनृणां नवीनफलदोऽप्यश्रांतसांद्रद्युति-
र्निश्छिद्रः सरलत्वकौतुककरः **प्राग्वाटवंशः** सताम् ॥

मौक्तिकहारसंकाशः समासीत्तत्र **वीहिलः** ।
श्रावको गुणसंयोगान्नराणां हृदये स्थितः ॥

समजनि धनदेवः श्रावकस्तस्य सूनुः प्रथितगुणसमुद्रो मंजुवाणीविलासः ।
गगनवलयरंगत्कीर्त्तिचंद्रोदयेऽस्मिन् लगति न च कलंका खंजनं यस्य सत्काः ॥

तस्य च भार्या यशोमती, तयोश्च पुत्रः गुणरत्नैकरोहणाचलः धर्मचंदनद्रुममलयः कीर्तिसुधाधवलितसमस्तविश्ववलयो यशोदेवश्रेष्ठी । तस्य च—

आंबीति नाम्ना जनवत्सलाऽभूद् भार्या यशोदेवगृहाधिपस्य ।
यस्याः सतीनां गुणवर्णनायामाद्यैव रेखा क्रियते मुनींद्रैः ॥

तयोश्च पुत्रा उद्धरण-आम्बिग-वीरदेवाख्या बभूवुः । सोली-लोली-सोखीनामानश्च पुत्रिकाः संजज्ञिरे । अन्यदा च सिद्धांतलेखनबद्धादरेण जिनशासनानुरंजितचित्तेन यशोदेव-श्रावकेण सिद्धांतविचारपर्यायपुस्तिका लेखयामास ।

पूज्यश्रीविमलाख्यसूरिगणभृच्छिष्यस्य चारित्रिणो
योग्याऽसौ गणिचंद्रकीर्त्तिविदुषो विद्वज्जनानंदिनी ।
शास्त्रार्थस्मृतिहेतवे परिलसज्ज्ञानप्रपा पुस्तिका
भक्तिप्रांचितयत्युपासकयशोदेवेन निर्मापिता ॥

यावच्चंद्ररवी नभस्तलयुषौ यावच्च देवाचलो
यावत् सप्तसमुद्रमुद्रितमही यावन्नभोमंडलम् ।
यावत् स्वर्गविमानसंततिरियं यावच्च दिग्दंतिन-
स्तावत् पुस्तकमेतदस्तु सुधियां व्याख्यायमानं मुद ॥ ७ ॥

इति प्रशस्तिः समाप्ता ॥ छ ॥

(6) Katicit Siddhānta Vicāra and Paryāya

(६) कतिचित् सिद्धान्तविचार तथा पर्याय

Folios - 11
Size - 13·7 × 2 inches
Language - Prakrit, Sanskrit
Condition - Fair
Age of MS. - c. Latter half of 15th cent. V. S.

*

II
PRAKARAṆA SECTION (प्रकरण विभाग)

No. 88 A Prakaraṇa Manuscript प्रकरण ग्रन्थ

Folios - 318 Language - Prakrit, Sanskrit

(1) Upadeśamālā Prakaraṇa (१) उपदेशमाला प्रकरण

Folios - 1-50
Extent - 542 Gāthās
Language - Prakrit
Size - 16 × 2·2 inches
Author - Dharmadāsa Gaṇi
Condition - Good
Age of MS. - 1290 V. S.

आदिः—

नमिऊण जिणवरिंदे इंदनरिंदच्चिए जगपईवे ।

अंतः—

जाव य लवणसमुद्दो जाव य नरखेत्तमंडिओ मेरू ।
ताव य रइया माला जयम्मि थिरथावरा होउ ॥ ५४२ ॥
उपदेसमालाप्रकरणं समाप्तम् ॥ छ ॥ मंगलं महाश्रीः ॥ ७ ॥

(2) Sthavirāvalī Prakaraṇa-Nandisūtramaṅgalagāthā
(२) स्थविरावली प्रकरण-नन्दिसूत्रमङ्गलगाथा

Folios - 50-54
Extent - 50 Gāthās
Language - Prakrit
Size - 16 × 2·2 inches
Author - Devavācaka
Condition - Good
Age of MS. - 1290 V. S.

आदिः—

जयइ जगजीवजोणीवियाणओ जगगुरू जगाणंदो ।

अंतः—

जे अन्ने भगवंते कालियसुयआणुओगिए धीरे ।
ते पणमिऊण सिरसा नाणस्स परूवणं वोच्छं ॥ ५० ॥
एवं थेरावलिया सम्मत्ता ॥ छ ॥

(3) Ekaviṁśatisthana Prakaraṇa (३) एकविंशतिस्थान प्रकरण

Folios - 54-60
Extent - 64 Gāthās
Language - Prakrit
Size - 16 × 2·2 inches
Author - Siddhasenasūri
Condition - Good
Age of MS. - 1290 V. S.

आदिः—

चवण विमाणा नयरी जणया जणणीओ रिक्ख रासीओ ।

अंतः—

इय एक्कवीस ठाणा उद्धरिया सिद्धसेणसूरीहिं ।
चउवीसजिणवराणं असेससाहारणा भणिउं ॥ ६४ ॥
॥ इति श्रीसिद्धसेनसूरिविरचितैकविंशतिस्थानकं समाप्तम् ॥ छ ॥

(4) [Bṛhat] Saṅgrahaṇī Prakaraṇa **(४) [बृहत्] संग्रहणी प्रकरण**

Folios - 60-93
Language - Prakrit
Author - Jinabhadra Gaṇi Kṣamāśramaṇa
Age of MS. - 1290 V. S.
Extent - 383 Gāthās
Size - 16 × 2·2 inches
Condition - Good

आदिः—

निट्ठवियअट्ठकम्मं वीरं नमिऊण तिगरणविसुद्धं ।

अंतः—

जं उद्धियं सुयाओ पुव्वायरियकयमहव समईए ।
